# SAN104

## *व्याकरणाध्ययनस्य प्रयोजनम्*

वेदार्थः रक्षकत्वात् वेदार्थबोधने सहायकत्वात् प्रकृति-प्रत्ययोपदेशपुरःसरं प्रतिपादकत्वात् अर्थसाधनेषु अन्यतमसाधनत्वेन प्रयुक्तत्वात् व्याकरणं नाम वेदाङ्ग महनीय श्रेष्ठञ्च अङ्गमङ्गेषु स्मृतम्। तत्र व्याकरण शव्दः- वि+आङ् पूर्वकाद् डुकृञ् करणे इत्यस्माद् धातोः करणाधिकरणयोश्च इति सूत्रेण ल्युटि अनुबन्धलोपे युवोरनाकौ इति सूत्रेण अन् प्रत्यये यणि प्रातिपदिकत्वेन स्वादिकार्ये 'व्याकरणम्' शब्दः सिद्ध्यति। अस्य परिभाषा- व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृति-प्रत्ययोः शब्दजन्यं ज्ञानं व्याकरणमिति व्याकरणमहाभाष्ये लक्षलक्षणे व्याकरणम्। अपि च विदितमेव विद्वच्चरणे गीर्वाणाध्यायनरसिकानां व्याकरणं शास्त्रं कीदृशं गौरवं भजति स्म। वेदादीनां सकलशास्त्राणां ज्ञानार्थं व्याकरणशास्त्रस्य नितान्तमावश्यकं वर्तते।

इदं व्याकरणं शास्त्रं न केवलं शब्दसाधनं, परन्तु दर्शनपदवीं प्राप्तुमपि सक्षमो विद्यते, यथा भर्तृहरिणा- "इदम् आद्यपदस्थानं सिद्धसोपानपर्वणाम् इयं सा मोक्षमाणानाम् मह्जिमा राज पद्धति"। इति ज्ञातुं शक्यते। उक्तञ्च भगवता पतञ्जलिनाऽपि- एक शब्दः संयग् ज्ञातः सुष्टु प्रयुक्तः स्वर्गे लोके च कामधुग् भवति। महाभाष्ये शब्दसाधुत्वबोधनं नाम तदेव शास्त्रं व्याकरणम्, निगदितं यत् 'शब्द शास्त्रं प्रमाणं ते कार्याकार्यं व्यवस्थितौ।' भगवता पतञ्जलिना महाभाष्ये मुख्यप्रयोजनत्वेन पञ्चप्रयोजनानि मुख्यत्वेन विधास्यन्ति। यथा- रक्षोहागमलघ्वसन्देहाः- इति रक्ष-रक्षार्थं वेदानाम् अध्यापयेत् व्याकरणम् इत्यादयः। गौणत्वेन च त्रयोदश आनुसङ्गिकप्रयोजनानि उररीकृत्य व्याकरणस्य अङ्गानां प्रधानतमम् अङ्गमस्तीति प्रमाणितम् ।

व्याकरणशास्त्रे विशेषतया पाणिनिसूत्राणां व्याख्या अस्ति। तेषां सहायकत्वेन कात्यायनकृतं वार्तिकमपि आवश्यकं वर्तते। उभाभ्यां सूत्रवार्तिकाभ्यां सम्यग्दिशाः विज्ञातुं महाभाष्यकारस्य व्यपेक्षा भवति । भाष्यकारेण व्याख्यानावसरे शेषावताररूपेण शिष्यान् अध्यापयति स्म, परन्तु विधिवशात्ते मृता बुभूवुः। एकेन ब्रह्मराक्षसेन महाभाष्यं स्वान् शिष्यान् अध्यापयत्। प्रमाणत्वेन महाभाष्ये सम्प्राप्यते- अजाभक्षितमिति। तेषां त्रिमुनीनां मतमाकारत्वेन प्रसिद्धोऽस्ति। यथोत्तरं मुनीनां प्रामाण्यमिति नागेश-वचनानुसारं यल्लक्षते।

"मुखं व्याकरणं स्मृतम्" इति वचनानुसारं सर्वेषु अङ्गेषु व्याकरणशास्त्रं मुख्यं श्रेष्ठञ्च इति निश्चयेन वक्तुं शक्यते। व्याकरणरहितो जनः अन्धवदेव यथा-

**"यद्यपि बहुनाधीषे पठ पुत्र व्याकरणम्।**

**स्वजनः श्वजनो माभूत् शकलं सकलं सकृच्छकृत्"।**

अतो व्याकरणशास्त्रस्य अध्ययनं अध्येतृणां निष्कारणो धर्म इति ।

।।इति।।